# वैयाकरणसिद्धान्तकौमुदी

## अजन्तनपुंसकलिङ्गप्रकरणम् (३)

११.०७.२०११

# पुनरावर्तनम्

- अकारान्तः नपुंसकलिङ्गः अजर-शब्दः
- अजरम् अजरसी/अजरे अजरांसि/अजराणि
- अजरसम्/अजरम् अजरसी/अजरे अजरांसि/अजराणि

- पद्दन्नोमास्... इति सूत्रेण हृदयशब्दस्य हृद्-आदेशः, उदक-शब्दस्य उदन्-आदेशः, आस्यशब्दस्य आसन्-आदेशः ।
- 'मांस-पृतना-सानूनां मांस-पृत्-स्नवो वाच्याः' इति वार्तिकेन मांसशब्दस्य मांस्-आदेशः ।

☙ वस्तुतस्तु प्रभृतिग्रहणं प्रकारार्थम् इत्युक्तम् ।

☙ अत एव भाष्ये 'मांस्पचन्या उखायाः' इत्युदाहृतम् ।

☙ अयस्मयादित्वेन भत्वात् संयोगान्तलोपो न ।

☙ 'पद्दन्...' इत्यत्र हि 'छन्दसि' इति अनुवर्तितं वृत्तौ, तथापि 'अपो भि' इत्यत्र 'मासश्छन्दसि' इति वार्तिके छन्दोग्रहणसामर्थ्यात् लोकेऽपि क्वचित् – इति कैयटोक्तरीत्या प्रयोगम् अनुसृत्य पदादयः प्रयोक्तव्या इति बोध्यम् ।

꧁ आकारान्ताः नपुंसकलिङ्गाः ।

꧁ श्रियं पाति इति श्रीपा ।

# ३१८. ह्रस्वो नपुंसके प्रातिपदिकस्य (१.२.४७)

- पदत्रयम् । ह्रस्वः, नपुंसके, प्रातिपदिकस्य ।
- क्लीबे प्रातिपदिकस्य अजन्तस्य ह्रस्वः स्यात् ।

- श्रीपा
- श्रीप (‘ह्रस्वो...’ – इति ह्रस्वः)
- श्रीपं ज्ञानवत् ।
- श्रीपाय
- अत्र संनिपातपरिभाषया ‘आतो धातोः’ इति आकारलोपो न ।
- अवर्णम् उपजीव्य प्रवृत्तः यादेशः अवर्णलोपं प्रति निमित्तं न भवति ।

इकारान्तः नपुंसकलिङ्गः ‘वारि’ शब्दः ।

वारि (सुँ) स्

# ३१९. स्वमोर्नपुंसकात् (७.१.२३)

- पदद्वयम् । सु-अमोः, नपुंसकात् ।
- ‘षड्भ्यो लुक्’ (७.१.२२) इत्यतः ‘लुक्’ इति अनुवर्तते । ‘अङ्गस्य’ (६.४.१) इति अधिक्रियते ।
- क्लीबाद् अङ्गात् परयोः स्वमोः लुक् स्यात् ।
- वारि स्
- वारि (‘स्वमोर्नपुंसकात्’ – इति सोः लुक्)
- वारि औ
- वारि (शी) ई (‘नपुंसकाच्च’ – ७.१.१९ – इति औङः शी)

# ३२०. इकोऽचि विभक्तौ (७.१.७३)

- पदत्रयम् । इकः, अचि, विभक्तौ ।
- 'इदितो नुम् धातोः' (७.१.५८) इत्यतः 'नुम्' इति, 'नपुंसकस्य झलचः' (७.१.७२) इत्यतः 'नपुंसकस्य' इति च अनुवर्तते ।
- इगन्तस्य क्लीबस्य नुमागमः स्याद् अचि विभक्तौ ।

- वारि ई
- वारिन् ई ('इकोऽचि विभक्तौ' – इति नुमागमः)
- वारिणी ('अट्कुप्वाङ्नुम्व्यवायेऽपि' – ८.४.२ – इति णत्वम्)

- वारि (जस्) अस्
- वारि (शि) इ ('जश्शसोः शिः' – ७.१.२०)
- वारिन् इ ('इकोऽचि विभक्तौ' – ७.१.७३ – इति नुमागमः)
- वारीन् इ ('सर्वनामस्थाने चासम्बुद्धौ' – ६.४.८ – इति उपधादीर्घः)
- वारीणि ('अट्कुप्वाङ्नुम्व्यवायेऽपि' – ८.४.२ – इति णत्वम्)

- हे वारि स्
- हे वारि ('स्वमोर्नपुंसकात्' – ७.१.२३ – इति सोः लुक्)
- 'प्रत्ययलोपे प्रत्ययलक्षणम्' (१.१.६२) इति प्रत्ययलक्षणात् 'ह्रस्वस्य गुणः' (७.३.१०८) इति गुणे प्राप्ते, 'न लुमताङ्गस्य' (१.१.६३) इति प्रत्ययलक्षणनिषेधः ।
- हे वारि ।
- 'न लुमताङ्गस्य' इति निषेधस्य अनित्यत्वपक्षे सम्बुद्धिनिमित्तो गुणः ।
- हे वारे ।

- ‘आङो नाऽस्त्रियाम्’ – वारिणा ।
- ‘घेर्ङिति’ इति गुणे प्राप्ते –
- ‘वृद्धि-औत्त्व-तृज्वद्भाव-गुणेभ्यो नुम् पूर्वविप्रतिषेधेन’ (वा)
- वारिणे ।
- वारिणः ।
- वारिणोः ।
- ‘नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन’ (वा) इति नुट् । ‘नामि’ इति दीर्घः । वारीणाम् ।
- वारिणि, वारिणोः ।
- हलादौ हरिवत् ।